# shrIlA NgUlAstrashatru njaya hanumatstotram

# શ્રીલાઙ્ગૂલાસ્ત્રશત્રુઞ્જય હનુમત્સ્તોત્રમ્

## Document Information

Text title : hanumallANgUlAstrastotram

File name : laanguulaastra.itx

Category : hanumaana, stotra, hanuman, astra

Location : doc_hanumaana

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com, Gopal

Proofread by : Ravin Bhalekar, Gopal Upadhyay gopal.j.upadhyay at gmail.com, PSA Easwaran

Latest update : May 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 28, 2021

*sanskritdocuments.org*

# shrIlA NgUlAstrashatru njaya hanumatstotram

# શ્રીલાઙ્ગૂલાસ્ત્રશત્રુઞ્જય હનુમત્સ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીસીતરામચન્દ્રાભ્યાં નમઃ ॥

લોકાભીરામં રણરઙ્ગધીરં રાજીવનેત્રં રઘુવંશ નાથમ્ ।
કારુણ્યરૂપં કરુણાકરં તં શ્રીરામચન્દ્રં શરણં પ્રપદ્યે ॥

ૐ હનુમન્તં મહાવીરં વાયુતુલ્યપરાક્રમમ્ ।
મમ કાર્યાર્થમાગચ્છ પ્રણમામિ મુહુર્મુહુઃ ॥

ૐ અસ્ય હનુમચ્છત્રુઞ્જયસ્તોત્રમાલામન્ત્રસ્ય શ્રીરામચન્દ્ર ઋષિઃ।
નાના છન્દાંસિ ।
શ્રીમન્મહાવીરો હનુમાન્દેવતા ।
મારુતાત્મજ હ્રૌં ઇતિ બીજમ્ ।
અઞ્જનાસૂનુ હ્સ્ફ્રેં ઇતિ શક્તિઃ ।
ૐ હાંહાંહાં ઇતિ કીલકમ્ ।
શ્રીરામભક્ત હ્રાં ઇતિ પ્રાણઃ ।
શ્રીરામલક્ષ્મણાનન્દકર હ્રાંહ્રીંહ્રૂં ઇતિ જીવઃ ।
મમારાતિપરાજયનિમિત્ત શત્રુઞ્જયસ્તોત્રમાલામન્ત્રજપે વિનિયોગઃ ॥

(બીજાદૌ સર્વત્ર સંયોજ્ય)

॥ અથ કરન્યાસઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફ્રેં ખ્ફ્રેં હ્સૌં હ્સ્ખ્ફ્રેંહ્સૌં નમો
હનુમતે અઙ્ગુષ્ઠાભ્યાં નમઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફ્રેં ખ્ફ્રેં હ્સૌં હ્સ્ખ્ફ્રેં હ્સૌં નમો
રામદૂતાય તર્જનીભ્યાં નમઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફ્રેં ખ્ફ્રેં હ્સૌં હ્સ્ખ્ફ્રેં હ્સૌં નમો
લક્ષ્મણપ્રાણદાત્રે મધ્યમાભ્યાં નમઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
અઞ્જનાસૂનવે અનામિકાભ્યાં નમઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
સીતાશોકવિનાશાય કનિષ્ઠિકાભ્યાં નમઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
લઙ્કાપ્રાસાદભઞ્જનાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥ ॥

ઇતિ કરન્યાસઃ ॥

॥ અથ હૃદયાદિષડઙ્ગન્યાસઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
હનુમતે હૃદયાય નમઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
રામદૂતાય શિરસે સ્વાહા ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
લક્ષ્મણપ્રાણદાત્રે શિખાયૈ વષટ્ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
અઞ્જનાસૂનવે કવચાય હુમ્ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
સીતાશોકવિનાશિને નેત્રત્રયાય વૌષટ્ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફેં ખ્ફેં હ્સૌં હ્સ્ખ્ફેં હ્સૌં નમો
લઙ્કાપ્રાસાદભઞ્જનાય અસ્ત્રાય ફટ્ ॥

॥ ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ॥

॥ અથ ધ્યાનમ્ ॥

ૐ ધ્યાયેદ્બાલદિવાકરદ્યુતિનિભં દેવારિદર્પાપહં
દેવેન્દ્રપ્રમુખૈઃ પ્રશસ્તયશસં દેદીપ્યમાનં રુચા ।
સુગ્રીવાદિસમસ્તવાનરયુતં સુવ્યક્તતત્ત્વપ્રિયં
સંરક્તારુણલોચનં પવનજં પીતામ્બરાલઙ્કૃતમ્ ॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥

વજ્રાઙ્ગપિઙ્ગકેશાઢ્યં સ્વર્ણકુણ્ડલમણ્ડિતમ્ ।
નિયુદ્ધ ઉપસઙ્ગાત્રં પારાવારપરાક્રમમ્ ॥

વામહસ્તગદાયુક્તં પાશહસ્તકમણ્ડલુમ્ ॥

ઉદ્યદ્દક્ષિણદોર્દણ્ડં હનુમન્તં વિચિન્તયેત્ ॥

ઇતિ ધ્યાત્વા અરેમલ્લચટખેત્યુચ્ચારણેઽથવા
તોડરમલ્લચટખેત્યુચ્ચારણે કપિમુદ્રાં પ્રદર્શયેત્ ॥

॥ અથ મન્ત્રઃ ॥

ૐ ઐં શ્રીં હ્રાંહ્રીંહ્રૂં સ્ફ્રેં ખ્ફ્રેં હ્સૌં હ્સ્ખ્ફ્રેં હ્સૌં
નમો હનુમતે ત્રૈલોક્યાક્રમણપરાક્રમ શ્રીરામભક્ત મમ
પરસ્ય ચ સર્વશત્રૂન્ ચતુર્વર્ણસમ્ભવાન્ પુંસ્ત્રીનપુંસકાન્
ભૂતભવિષ્યદ્ધર્તમાનાન્ નાનાદૂરસ્થસમીપસ્થાન્ નાનાનામધેયાન્
નાનાસઙ્કરજાતિજાન્ કલત્રપુત્રમિત્રભૃત્યબન્ધુસુહૃત્સમેતાન્
પશુશક્તિસહિતાન્ ધનધાન્યાદિસમ્પત્તિયુતાન્ રાજ્ઞો રાજપુત્રસેવકાન્
મન્ત્રીસચિવસખીન્ આત્યન્તિકક્ષણેન ત્વરયા એતદ્દિનાવધિ
નાનોપાયૈર્મારય મારય શસ્ત્રૈશ્છેદય છેદય અગ્નિના
જ્વાલય જ્વાલય દાહય દાહય અક્ષયકુમારવત્પાદતલાક્રમણેનાન
શિલાતલેન ત્રોટય ત્રોટય ઘાતય ઘાતય વધ વધ ભૂતસઙ્ઘૈઃ
સહ ભક્ષય ભક્ષય ક્રૂદ્ધચેતસા નખૈર્વિદારય વિદારય
દેશાદસ્માદુચ્ચાટય ઉચ્ચાટય પિશાચવત્ ભ્રંશય ભ્રંશય
ભ્રામય ભ્રામય ભયાતુરાન્ વિસંજ્ઞાન્ સદ્યઃ કુરુ કુરુ ભસ્મીભૂતાન્
ઉદ્ધૂલય ઉદ્ધૂલય ભક્તજનવત્સલ સીતાશોકાપહારક સર્વત્ર
મામેનં ચ રક્ષ રક્ષ હાંહાંહાં હુંહુંહું ઘેઘેઘે હું ફટ્ સ્વાહા ॥

ૐ નમો હનુમતે મહાબલપરાક્રમાય મહાવિપત્તિનિવારકાય
ભક્તજનમનઃકામનાકલ્પદ્રુમાય દુષ્ટજનમનોરથસ્તમ્ભનાય
પ્રભઞ્જનપ્રાણપ્રિયાય સ્વાહા ॥

ૐ હ્રાંહ્રીંહ્રૂંહ્રૈંહ્રૌંહ્રઃ મમ શત્રૂન્ શૂલેન છેદય છેદય
અગ્નિના જ્વાલય જ્વાલય દાહય દાહય ઉચ્ચાટય ઉચ્ચાટય હું ફટ્ સ્વાહા ॥

॥ ઇતિ મન્ત્રં પઠિત્વા પુનર્ધ્યાયેત્ ॥

ૐ હનુમતે નમઃ ।

ધ્યાનમ્ ।

શ્રીમન્તં હનુમન્તમાર્તરિપુભિદ્ભૂભૃત્તટભ્રાજિતં
ચાલ્પદ્વાલધિબન્ધવૈરિનિચયં ચામીકરાદ્રિપ્રભમ્ ।
અષ્ટૌ રક્તપિશઙ્ગનેત્રનલિનં ભ્રૂભઙ્ગભઙ્ગસ્ફુરત્
પ્રોદ્યચ્ચણ્ડમયૂખમણ્ડલમુખં દુઃખાપહં દુઃખિનામ્ ॥

કૌપીનં કટિસૂત્રમૌઞ્જ્યજિનયુગ્દેહં વિદેહાત્મજા-
પ્રાણાધીશપદારવિન્દનિરતં સ્વાન્તઃકૃતાન્તં દ્વિષામ્ ।
ધ્યાત્વૈવં સમરાઙ્ગણસ્થિતમથાનીય સ્વહૃત્પઙ્કજે
સમ્પૂજ્યાખિલપૂજનોક્તવિધિના સમ્પ્રાર્થયેદર્ચિતમ્ ॥

(સમ્પ્રાર્થયેત્ પ્રાર્થિતમ્)

ઇતિ ધ્યાત્વા સ્તોત્રં પઠેત્ ।

હનુમન્નઞ્જનાસૂનો મહાબલપરાક્રમ ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧॥

મર્કટાધિપ માર્તણ્ડમંડલગ્રાસકારક ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૨॥

અક્ષક્ષપણ પિઙ્ગાક્ષ ક્ષિતિજાસુક્ષયઙ્કર ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૩॥

રુદ્રાવતારસંસારદુઃખભારાપહારક ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૪॥

શ્રીરામચરણામ્ભોજમધુપાયિતમાનસ ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૫॥

વાલિકાલરદક્લાન્તસુગ્રીવોન્મોચનપ્રભો ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૬॥

સીતાવિરહવારીશભગ્નસીતેશતારક ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૭॥

રક્ષોરાજપ્રતાપાગ્નિદહ્યમાનજગદ્વન ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૮॥

ગ્રસ્તાશેષજગત્સ્વાસ્થ્ય રાક્ષસામ્ભોધિમન્દર ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૯॥

પુચ્છગુચ્છસ્ફુરદ્વીર જગદ્ગ્ધારિપત્તન ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૦॥

જગન્મનોદુરુલ્લઙ્ઘ્યપારાવારવિલઙ્ઘન ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૧॥

સ્મૃતમાત્રસમસ્તેષ્ટપૂરક પ્રણતપ્રિય ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૨॥

રાત્રિઞ્ચરચમૂરાશિકર્તનૈકવિકર્તન ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૩॥

જાનકીજાનકીજાનિપ્રેમપાત્ર પરન્તપ ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૪॥

ભીમાદિકમહાવીરવીરાવેશાવતારક ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૫॥

વૈદેહીવિરહાક્રાન્તરામરોષૈકવિગ્રહ ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૬॥

વજ્રાઙ્ગનખદંષ્ટ્રેશ વજ્રિવજ્રાવગુણ્ઠન ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૭॥

અખર્વગર્વગન્ધર્વપર્વતોદ્ભેદનસ્વર ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૮॥

લક્ષ્મણપ્રાણસન્ત્રાણ ત્રાતતીક્ષ્ણકરાન્વય ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૧૯॥

રામાદિવિપ્રયોગાર્ત ભરતાદ્યાર્તિનાશન ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૨૦॥

દ્રોણાચલસમુત્ક્ષેપસમુત્ક્ષિપ્તારિવૈભવ ।
લોલલ્લાઙ્ગૂલપાતેન મમારાતીન્નિપાતય ॥ ૨૧॥

સીતાઽઽશીર્વાદસમ્પન્ન સમસ્તાવયવાક્ષત ।
લોલલાંગૂલપાતેન મમારાતીન્નિપાતય ॥ ૨૨॥

ઇત્યેવમશ્વત્થતલોપવિષ્ટઃ શત્રુઞ્જયં નામ પઠેત્સ્વયં યઃ ।
સ શીઘ્રમેવાસ્તસમસ્તશત્રુઃ પ્રમોદતે મારુતજપ્રસાદાત્ ॥ ૨૩॥

ઇતિ શ્રીલાંગૂલાસ્ત્ર શત્રુઞ્જયં હનુમત્સ્તોત્રમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com,
Gopal Upadhyay gopal.j.upadhyay at gmail.com,
Psa Easwaran psaeaswaran at gmail.com

*shrIlA NgUlAstrashatru njaya hanumatstotram*
pdf was typeset on May 28, 2021

Please send corrections to *sanskrit@cheerful.com*